# श्रीमद् भागवत रसिक कुटुंब

## अर्जुन कृत दुर्गा स्तुति

**अर्जुन उवाच**

**नमस्ते सिद्धसेनानि, आर्ये मन्दरवासिनि ।**
**कुमारि कालि कापालि, कपिले कृष्णपिंगले ॥1॥**

**भद्रकालि नमस्तुभ्यं(म्), महाकालि नमोऽस्तु ते।**
**चण्डि चण्डे नमस्तुभ्यं(न्), तारिणी वरवर्णिनि ॥2॥**

**कात्यायनि महाभागे, करालि विजये जये ।**
**शिखिपिच्छध्वजधरे, नानाभरणभूषिते ॥3॥**

**अट्टशूलप्रहरणे, खड्गखेटकधारिणि ।**
**गोपेन्द्रस्यानुजे ज्येष्ठे, नन्दगोपकुलोद्भवे ॥4॥**

**महिषासृक्प्रिये नित्यं(ङ्), कौशिकी पीतवासिनि ।**
**अट्टहासे कोकमुखे, नमस्तेऽस्तु रणप्रिये ॥5॥**

उमे शाकम्भरि श्वेते, कृष्णे कैटभनाशिनि ।
हिरण्याक्षि विरूपाक्षि, सुधूम्राक्षि नमोऽस्तु ते ॥6॥

वेदश्रुति महापुण्ये, ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु, नित्यं(म्) सन्निहितालये ॥7॥

त्वं(म्) ब्रह्मविद्या विद्यानां(म्), महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति, दुर्गे कान्तारवासिनि॥8॥

स्वाहाकारः(स्) स्वधा चैव, कला काष्ठा सरस्वती ।
सावित्रि वेदमाता च, तथा वेदान्त उच्यते ॥9॥

स्तुतासि त्वं(म्) महादेवि, विशुद्धेनान्तरात्मा ।
जयो भवतु मे नित्यं(न्), त्वत्प्रसादाद् रणाजिरे ॥10॥

कान्तारभयदुर्गेषु, भक्तानां(ञ) चालयेषु च ।
नित्यं(वँ) वससि पाताले, युद्धे जयसि दानवान् ॥11॥

त्वं(ञ) जम्भनी मोहिनी च, माया ह्रीः(श्) श्रीस्तथैव च ।
सन्ध्या प्रभावती चैव, सावित्री जननी तथा ॥12॥

तुष्टिः(फ्) पुष्टिर्धृतिदीप्तिश्- चन्द्रादित्यविवर्धिनी ।
भूतिर्भूतिमतां(म्) संख्ये, वीक्ष्यसे सिद्धचारणैः ॥13॥